# Yatipati Shannavatih

# યતિપતિષણ્ણવતિઃ

## Document Information

Text title : Yatipati Shannavatih

File name : yatipatiShaNNavatiH.itx

Category : deities_misc, stotra, gurudev, shataka

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description/comments : Ramanujastotraratnavali, Ramanuja Sampradaya. (Prayer to Shri Ramanujacharya)

Latest update : December 25, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# યતિપતિષણ્ણવતિઃ

॥ શ્રીઃ ॥

॥ શ્રીનિધયે નમઃ ॥

॥ શ્રીમતે રામાનુજાય નમઃ ॥

અથ (૧)યતિપતિષણ્ણવતિઃ ॥

કવિતાજિતકલ્લોલિકન્યકાકાન્તવક્ષસે ।
કરુણાદિગુણાઢ્યાય કમલાનિધયે નમઃ ॥

(૧. અનુષ્ટુભ્)
વન્દે (૨)નલાગ્રજશરચ્ચાપજં ચાપપત્તને ।
કુર્વન્ (૩)નલાનુજશરન્મધુજાતયતિસ્તુતિમ્ ॥ ૧॥

એવં શુભસન્દેશાવહરામાનુજપત્રિકાયૈ સ્વકૃતજ્ઞતાં દર્શયન્તઃ
૯૦–તમે શ્લોકે શ્લેષેણ શ્રીરામાનુજસામ્યં તસ્યા ઉપપાદયન્તિ
કવીશ્વરાઃ ॥

પિઙ્ગલવત્સરે ભગવતો રામાનુજસ્ય અવતારઃ । સ ચ ભગવતઃ
આદિશેષસ્ય અવતારવિશેષઃ । છન્દશ્શાસ્ત્રકૃત્ પિઙ્ગલમુનિશ્ચ તથા
આદિશેષસ્ય અવતારવિશેષઃ । અતઃ નાનાવિધ (૫૪) વૃત્તૈરભિપૂર્ણેયં
ષણ્ણવતિઃ કલ્પિતા કવિસાર્વભૌમૈઃ ॥

(૨. પઙ્ક્તિવિશેષઃ- યતિનુતિઃ(૪))
પિઙ્ગલનામકવત્સરજં મઙ્ગલદં યતિવૃન્દપતિમ્ ।
પિઙ્ગલદર્શિતવૃત્તકુલૈઃ અઙ્ગલસચ્છુભપુણ્ડ્રમયે ॥ ૨॥

(૩. વિયોગિની)
અભિવન્ધ યતીન્દ્રસંશ્રયાન્
અનઘાનાશ્રિતપાપનાશકાન્ ।

અહમદ્ય કરોમિ સન્મુનેઃ
    અતિહૃદ્યામલવૃત્તમાલિકામ્ ॥ ૩॥

(૪. માલભારિણી)
ભગવન્નુદિતો(૫) ભવસ્ય તારે
    મતમંહો ! સ ભવસ્ય તલ્લુનાસિ ।
મધુમાસભવસ્તથા કથં વા
    મધુવિદ્વેષિણિ સક્તમાનસોઽભૂઃ ॥ ૪॥

ભગવન્નુદિતો ભવસ્ય તારે
    ભવતારાય નતસ્ય ચેષ્ટસે ત્વમ્ ।
મધુમાસભવસ્તથૈવ સંયક્
    મધુમદ્ભાષ્યયુગં પ્રણીતવાન્ ત્વમ્ ॥ ૫॥

(૫. શ્રીઃ)
શ્રીસ્તે । સા સ્તાત્ ॥ ૬॥

(૬. સ્ત્રી)
શ્રીમન્ ! યોગિન્ ! । વિદ્યાં દદ્યાઃ ॥ ૭॥

(૭. મૃગી)
દીવ્યતાન્માનસે । મે ભવાન્ સન્તતમ્ ॥ ૮॥

(૮. કન્યા)
યોગિન્નસ્મત્સ્વામિન્ ! જીયાઃ । જીયા યોગિન્નસ્મત્સ્વામિન્ ! ॥ ૯॥

(૯. પઙ્ક્તિઃ)
શ્રીયતિનેતુઃ ધ્યાનવિધાતા । પશ્યતિ તત્ત્વં વેદશિરસ્થમ્ ॥ ૧૦॥

(૧૦. પ્રિયા)
યતિરાટ્પદે નિરતસ્સદા ।
યમભીકરો ભવિતા પુમાન્ ॥ ૧૧॥

(૧૧. તનુમધ્યા)
મૂર્તિર્યતિનેતુઃ શોણાયિતવસ્ત્રા ।
વંશં કલયન્તી પાયાદઘરાશેઃ ॥ ૧૨॥

(૧૨. નરપ્રિયા(૬))
ભવતિ ભાષ્યકૃત્ ભગવતઃ પ્રિયઃ ।

ભવભયાપહો ભજ તમુન્નતમ્ ॥ ૧૩॥

(૧૩. સોમરાજી)
યદા લક્ષ્મણાર્યં મુદા પૂજયેન્ના ।
તદા વેદશીર્ષ્ણાં વિદા શંસિતસ્સ્યાત્ ॥ ૧૪॥

(૧૪. મદલેખા)
રાજાયં યતિપઙ્ક્તેઃ રાજા સન્ દ્વિજપઙ્ક્તેઃ ।
અજ્ઞાનં ભવરાત્રેઃ નુદ્યાન્નસ્તમ એતત્ ॥ ૧૫॥

રામાયામયિ રાગં મા યાયા મમ ચિત્ત ! ।
ગોદાયાસ્સહજેઽસ્મિન્ માયાયા હૃતિ યાયાઃ ॥ ૧૬॥

(અનુષ્ટુભ્)
શ્રીમદ્રામાનુજૌ વન્દે ગીતાતદ્ભાષ્યદાયિનૌ ।
વંશાલઙ્કૃતહસ્તાબ્જૌ ગોદાનાથસહોદરૌ ॥ ૧૭॥

અદ્વૈતં શ્રવસાં નેત્રૈઃ દ્વૈતં ચ રસનાસુ યઃ ।
ધત્તે સ એવ યોગી સન્ વિશિષ્ટાદ્વૈતમબ્રવીત્ ॥ ૧૮॥

(૧૫. પ્રમાણિકા)
શ્રુતિસ્મૃતિપ્રમાણિકા યતિપ્રકાણ્ડભારતી ।
સુધાનિમગ્નવિગ્રહં કરોતિ પણ્ડિતં જનમ્ ॥ ૧૯॥

(૧૬. ગજગતિઃ)
બુધગણૈરભિનુતો મુનિમણિઃ શ્રિતહરિઃ ।
શ્રુતિશિરઃકૃતમતિઃ શુભતતિં વિતનુતામ્ ॥ ૨૦॥

(૧૭. બૃહતીવિશેષઃ યાદવી(૭))
યાદવવઞ્ચિતચેતા યઃ યાદવપૂજિતપાદો યઃ ।
યાદવપર્વતવાસી યઃ યાદવવંશજચેતા યઃ ॥ ૨૧॥

(૧૮. બૃહત્યુપજાતિઃ)
બ્રાહ્મણરાક્ષસપીડાયાઃ ભૂપતિપુત્રીં પાલયતા ।
ખ્યાપિતરામાનુજનામ્ના સંયમિરાજા તેન વયમ્ ॥ ૨૨॥

(૧૯. ચમ્પકમાલા)
હન્ત સનાથા તેન ન ચિન્તા
સંસૃતિરક્ષોભૂતપિશાચાત્ ।

લક્ષ્મણયોગીડ્શ્રીપદસક્તાન્
    લક્ષ્મણપૂર્વઃ પાતુમિહાસ્તિ ॥ ૨૩॥

મત્તમયૂરો બાણરણેઽભૂત્
    ખણ્ડિતવીર્યો યેન ષડાસ્યઃ ।
તં હિ ભુજઙ્ગં કઞ્ચન ચિત્તે
    હન્ત વિધત્તે શ્રીયતિરાજઃ ॥ ૨૪॥

(૨૦. મત્તા)
મા મા ચેતો ધનમદમત્તાન્
    યાયા મર્ત્યાન્ શ્ૃણુ તવ પથ્યમ્ ।
યોગીન્દો હે યતિશતમન્યો !
    નાથેત્યેવં વદ સુખભાક્ સ્યાઃ ॥ ૨૫॥

(૨૧. પઙ્ક્તિવિશેષઃ યતિમહિતા(૮))
અયિ ભજ માનસ ! યતિરાજં
    શ્રિતહિતદાયકપદરેણુમ્ ।
યદિ ભવભીકુલમપનેતું
    મતિરપિ તે મુદમથ ભોક્તુમ્ ॥ ૨૬॥

(૨૨. ત્વરિતગતિઃ)
મતમખિલં શ્રુતિરહિતં
    યતિપતિના પરિમથિતમ્ ।
શ્રુતિમધુરં પરમરતં
    જગતિ તતં જયતિતરામ્ ॥ ૨૭॥

(૨૩. સ્વાગતા)
ધન્વિનવ્યપુરજાતરસાયાઃ
    ઇષ્ટપૂરકસહોદર ! ધીર ! ।
સંયમીન્દ્ર ! કરુણારસલીલા-
    સૌધમાનસ ! સદા વસ ચિત્તે ॥ ૨૮॥

શેમુષીતિ ભવતા કિલ પદ્યે
    સમ્પ્રયુક્તમયિ ! શેષ ! યતીન્દ્ર ! ।
યોઽમુમીરયતિ શબ્દમભિજ્ઞઃ
    તસ્ય ભાતિ હૃદયે સ હિ શેષી ॥ ૨૯॥

સંયમીન્દ્રપદપદ્મભવાન્ યે
    સંવહન્તિ શિરસા શુભરેણૂન્ ।
સન્નમન્તિ સહસા સુરલોકાઃ
    સઙ્ઘશોઽતિવિનયેન યુતાસ્તાન્ ॥ ૩૦॥

(૨૪. ઇન્દ્રવજ્રા)
શ્રીવારિજાતોદિતક્લૃપ્તતાદૃક્-
    શ્રીવાજિમેધોદિતવિગ્રહાય ।
શ્રીવારણાદ્રીશ્વરભૂષણાય
    શ્રીવારિદો ભાતિ યતીશ્વરો નઃ ॥ ૩૧॥

(૨૫. ઉપજાતિઃ)
સરસ્વતીયં સરસા ભવન્તં
    સન્યાસિનં નામ સદાઽઽશ્રયન્તી ।
સન્યાસિની સાધુ બભૂવ તસ્માત્
    સન્તં ન યોગં સહતે સ્વભર્તુઃ ॥ ૩૨॥

શ્રીલક્ષ્મણાચાર્યપદાવલમ્બી
    કદાઽપિ કૃચ્છ્રં ન સમેતિ ધન્યઃ ।
શ્રીલક્ષ્મણે તત્પદસંશ્રયે ચ
    શ્રીરામભદ્રસ્સુમનાસ્સ તાદૃક્ ॥ ૩૩॥

(૨૬. અનુકુલા)
સંયમિનેતુશ્ચરણસરોજં
    સન્તતમન્તર્વિલસતુ માન્યમ્ ।
સઙ્કટસઙ્ઘઃ પ્રતિચકિતો યત્
    સમ્પ્રતિ ભીતઃ પરિગલિતોઽસ્મત્ ॥ ૩૪॥

(૨૭. દોધકમ્)
સંયમિનાયકપાદભવાનાં
    સાત્વિકસન્તતિમૌલિધૃતાનામ્ ।
સંસૃતિસમ્ભવતાપહરાણાં
    સન્તુ કણા મયિ રેણુગણાનામ્ ॥ ૩૫॥

(૨૮. વંશસ્થમ્)
સ નામ લોકે મનુજો મહીયતે

સ નામ દૂરીકુરુતેऽઘવિભ્રમમ્ ।
સ નામ સર્વાનિહ વિન્દતે શુભાન્
સદા મુદા યો યતિરાજસેવકઃ ॥ ૩૬॥

(૨૯. ભુજઙ્ગપ્રયાતમ્)
અહો યાદવાદ્યૈર્વનાન્તર્વિસૃષ્ટઃ
કિરાતેન કેનાऽપિ જાયાયુતેન ।
નિમેષેણ નીતોऽસિ કાઞ્ચીસમીપં
રસં પાતુકામેન નિત્યં ધરણ્યામ્ ॥ ૩૭॥

સુચિત્રાવતારં ભવન્તં સુધીન્દ્રાઃ
વદન્ત્યેવ યુક્તં તતસ્સંયમીન્દ્ર ! ।
સુચિત્રાવતારો ભવાન્ સત્યમેતત્
કિમત્રાસ્તિ ચિત્રં પરામર્શભાજામ્ ॥ ૩૮॥

(૩૦. સ્રગ્વિણી)
લક્ષ્મણં સન્મુનિં ભાવયે સન્તતં
ભક્તિમત્તલ્લજં શ્રીપતેઃ પાદયોઃ ।
અમ્બરં શોણિતં દણ્ડકં પુણ્ડ્રકં
બિભ્રતં વિગ્રહે માનસે સદ્દયામ્ ॥ ૩૯॥

(૩૧. દ્રુતવિલમ્બિતમ્)
યતિપતે ! કપિલાદિમતાનિ તે
ભણિતિભિઃ પરમુન્નતયુક્તિભિઃ ।
પરિહૃતાનિ વિચિન્ત્ય વિદઃ શ્રુતેઃ
પરમનન્દથુપૂરિતમાનસાઃ ॥ ૪૦॥

ભવભજં ભજ હે ભવભઞ્જકં
ભવપિતુઃ પિતુરાન્તરરઞ્જકમ્ ।
ભવતતિર્ભવતીહ પરત્ર સા
ભવ મનો ! મમ તેન નિરાકુલમ્ ॥ ૪૧॥

(૩૨. કુસુમવિચિત્રા)
યતિપતિવાણી સરલગભીરા
શ્રુતિશતનન્દ્યા મુરરિપુભોગ્યા ।
મનસિ મદીયે વિલસતુ નિત્યં

પરમતજાતૈરપિ બહુમાન્યા ॥ ૪૨॥

(૩૩. મણિમાલા)

નિત્યં કુરુ કણ્ઠે યોગીશ્વરનામ્નાં
વર્ણાવલિરૂપાં કાઞ્ચિન્મણિમાલામ્ ।
ભીતિર્ન ભવાખ્યાત્ ભીમાદહિરાજાત્
ચિત્તે તવ કુર્યાત્ નૃત્તં મમમિત્ર ! ॥ ૪૩॥

(૩૪. લલિતા)

શ્રીલક્ષ્મણાર્યમુનિનાથકીર્તનાત્
શ્રીલક્ષિતાત્મપૃથુવક્ષસો હરેઃ ।
શ્રીપૂરિતાનિ લલિતાનિ તે પુરઃ
શ્રીમન્ ! ભવન્તિ મમ મિત્ર ! નિશ્ચિતમ્ ॥ ૪૪॥

(૩૫. મઞ્જુભાષિણી)

પ્રમદાનુસારનિરતેન ચેતસા
મદનાનુકૂલલલિતેન મોહિતે ।
ભવભીતિદાયિગહને કૃતભ્રમે
મયિ લક્ષ્મણાર્ય ! કુરુ વીક્ષણં મનાક્ ॥ ૪૫॥

પ્રમિતાક્ષરાઽપિ સકલાર્થશેવધિઃ
યતિરાજસૂક્તિરનઘા વિરાજતે ।
ઇતિ નામ હન્ત વિબુધા મુદા યુતાઃ
સતતં ત્વદીયપદસેવને રતાઃ ॥ ૪૬॥

યદિ નામ ભીતિમુપયાસિ સંસૃતેઃ
યમયાતનાદિબહુઘોરભાજનાત્ ।
યદુવંશનાથલલિતૈકમગ્નહૃત્-
યતિવૃન્દનાથપદપઙ્કજં ભજ ॥ ૪૭॥

વનિતાવિલાસરમણીયવક્ષસા
વસુધાતલેઽત્ર બહુધા વિહારિણા ।
વસુદેવદેવવરદેવકીભુવા
વદતીહ યોઽતિ યતિરાટ્ તમાશ્રયે ॥ ૪૮॥

મદનેન પાપસદનેન કેવલં
મધુવૈરિપાદભજનૈકવૈરિણા ।

મમ માનસં હિ પરિમોહિતં હિતં
    મહિતં હિતાય યતિરાજમાશ્રયે ॥ ૪૯॥

કલિકાલજાતકલુષાભિભૂતધીઃ
    કમલાધિનાથહૃદયા પ્રિયોઽનિશમ્ ।
(૯) કમલાસકુક્ષિકરુણાજુષાઽમુના
    કલયામિ નામ કમલાપતિં કરે ॥ ૫૦॥

યતિનાયકે ત્રિતનુદણ્ડમણ્ડિતે
    ગુણવારિધૌ નિખિલપુરુષાર્થદે ।
રતમાનસાય નતિવૃન્દદાયિની
    જનતા શુભં નિખિલમત્ર વિન્દતે ॥ ૫૧॥

દધિદુગ્ધકુન્દશરદિન્દુપાણ્ડરૈઃ
    દશ ચૈકમેકમિતિ પુણ્ડ્રજાલકૈઃ ।
પરિમણ્ડિતં ભજત હંસમદ્ભુતં
    રમણીયપિઙ્ગશુભરેખિકાયુતૈઃ ॥ ૫૨॥

(૩૬. પ્રહર્ષિણી)
ઉદ્વિગ્નો ભવવિપિનાદનેકદુઃખાત્
    ઉદ્ધન્તું યદિ કુરુષેઽથ મિત્રરાજમ્ ।
ઉન્નામ્નો રવિવસતેઃ ગુણાન્ વિવેક્તુઃ
    ઉદ્યોગં કુરુ સુહૃદસ્ય કીર્તને ત્વમ્ ॥ ૫૩॥

(૩૭. મત્તમયૂરમ્)
કાઞ્ચીપૂર્ણાત્ પ્રાપ્ય ગિરઃ ષટ્ કરિશૈલ-
    શ્રીનાથપ્રોક્તાઃ શુભદાઃ શ્રીયતિરાજઃ ।
આશ્રિત્યાસૌ તં ચ મહાપૂર્ણગુરૂદ્ધં
    હૃષ્ટસ્તસ્થૌ યસ્તમુદારં કલયામિ ॥ ૫૪॥

(૩૮. વસન્તતિલકં)
શૈલો હિ તસ્ય વપુરેવ હરેઃ કથં વા
    પદ્ભ્યાં ચરેયામતિ કુઞ્ચિતજાનુભાગઃ ।
આરોહણં કલયતિ સ્મ ગિરેર્મહાન્ યઃ
    તસ્યાઙ્ઘ્રિપદ્મયુગલં શરણં પ્રપદ્યે ॥ ૫૫॥

મન્મૌલિમણ્ડનમહો મહિતા મહીયં

અસ્યાશ્ચ મણ્ડનમિદં તવ પાદપદ્મમ્ ।
તન્ન્યસ્તુમત્ર મયિ કિં ચકિતો યતીન્દ્ર !
સ્વામિન્ ! ઇતીવ વદતિ સ્મ ગિરિશ્ચ શેષઃ ॥ ૫૬॥

એતત્ દ્વયં સમવલોક્ય સપદ્યનન્તઃ
તત્રૈવ વેઙ્કટપતિઃ સ્વયમાવિરાસીત્ ।
યદ્વન્દનોદિતવિલોચનમોદવારિ-
સમ્પ્લાવિતસ્સ ભગવાનપિ શૈલરાજઃ ॥ ૫૭॥

શ્રીરઙ્ગરાજદયિતાસહસમ્ભવાય
શ્રીદેવરાજહૃદયઙ્ગમનીરદાય ।
શ્રીશ્રીનિવાસધરણીધરવિગ્રહાય
સમ્પત્કુમારજનકાય નમો નમસ્તે ॥ ૫૮॥

પુણ્ડ્રત્રિદણ્ડપરિમણ્ડિતગાત્રમેનં
પુણ્ડ્રેક્ષુદણ્ડપરિમણ્ડિતગાત્રમેકમ્ ।
પુંસોઽપિ હન્ત પરમે પુરુષેઽનુરક્તાન્
પુણ્યાનતીવ કલયન્તમવૈમિ કામમ્ ॥ ૫૯॥

(૩૯. અપરાજિતા)
યતિપતિમતકાઃ પરૈરપરાજિતાઃ
અપિ યમપૃતનાં નિજાર્થમુપાગતામ્ ।
તનુગતતુલસીસ્રગાદિપરાજિતાં
વિદધતિ મયિ સન્તુ તે પ્રસન્નાઃ ॥ ૬૦॥

(૪૦. પ્રહરણકલિતા)
યતિપતિપદયોઃ નતિમિહ વહતઃ
મતિરતિસુભગા ગતિરતિપરમા ।
ભગવતિ મહતી રતિરપિ ભવિતા
ભવતિ ચ ભવતો ન હિ ભયકણિકા ॥ ૬૧॥

(૪૧. માલિની)
સરલમતિગભીરં પાવનં ધન્યલભ્યં
મધુરતમમુદારં મઙ્ગલં માનનીયમ્ ।
વિરતવિતતિતથ્યં ભાષિતં યસ્ય સર્વં
સ જયતિ યતિરાજઃ સાર્વભૌમો ગુરૂણામ્ ॥ ૬૨॥

અનુપમમતિહૃદ્યં પાવનં ધન્યલભ્યં
　　કલિબલમલલોપં કલ્પકં કાઙ્ક્ષિતાનામ્ ।
કમલનયનભોગ્યં યદ્વચો ભાતિ સર્વં
　　સ જયતિ યતિરાજઃ સાર્વભૌમો ગુરૂણામ્ ॥ ૬૩॥

કમલમિવ મનોજ્ઞં (૧)ષડ્પદાનન્દભાવં
(ષડ્પદ - ભૃઙ્ગઃ । દ્વયાખ્યમન્ત્રશ્ચ ॥)
વિમલમિવ નભો યત્ (૨)સત્કુલાલોકપાત્રં
(સત્કુલં - નક્ષત્રાણાં કુલમ્ । સતાં કુલં ચ ।)
અમલમિવ મુનીનાં માનસં સર્વતત્ત્વં
પ્રથયતિ વચનં તે લક્ષ્મણાચાર્યવર્ય ! ॥ ૬૪॥

(૪૨. ચામરમ્)
શોણવસ્ત્રવેષ્ટિતં વિભાતિ યત્રિદણ્ડવત્
　　પુણ્ડ્રજાલમણ્ડિતં ચ દારુપાદુકાયુતમ્ ।
વિષ્ણુચિત્તબાલિકાસ્યજાતસૂક્તિચિન્તકં
　　લક્ષ્મણાર્યનામકં તદસ્તુ ભૂતયે મમ ॥ ૬૫॥

સંયમીન્દ્રપાદપદ્મસઙ્ગતેન ચેતસા
　　માનવોઽત્ર નેતરત્ર સઙ્ગમેતિ યસ્સ મે ।
બન્ધુરત્નમન્તરઙ્ગમિત્રરત્નમિષ્યતે
　　દેશિકોઽપિ સોઽયમેવ તત્ પરં ચ દૈવતમ્ ॥ ૬૬॥

(૪૩. પઞ્ચચામરમ્)
યતીન્દ્રવક્ત્રનિર્ગતૈશ્શુભાક્ષરૈઃ પ્રપૂરિતં
　　શ્રુતિસ્મૃતીતિહાસતઃ સમુદ્ધૃતૈસ્તથા રસૈઃ ।
પરાશરાત્મજાતજાતસૂત્રમાર્ગસઙ્ગતં
　　પરાવરજ્ઞભાવિતં વિભાતિ ભાષ્યમદ્ભુતમ્ ॥ ૬૭॥

નિધાય વેત્રમઞ્જસા સ્વમૌલિવેષ્ટનાન્તરા
　　પ્રબોધમુદ્રિકાં વહન્ પ્રમોદપૂરિતાન્તરઃ ।
સ્તોત્રસૂત્રસત્કરઃ પરો જગાદ યત્પુરા
　　યતીન્દ્રભાષ્યમણ્ડિતં તદત્ર ભાતિ શોભનમ્ ॥ ૬૮॥

સુનવ્યકાવ્યસેવનાત્ સુશાસ્ત્રયુક્તિસેવનાત્
　　શ્રુતિસ્મૃતીતિહાસતઃ સદાગમાન્તસેવનાત્ ।

યદત્ર વિન્દતે પરં જનો મનોવિનોદનં
    તતોઽપિ ગદ્યસેવનાત્ યતીશ્વરસ્ય વિન્દતિ ॥ ૬૯॥

કૃતાગમાર્થસઙ્ગ્રહઃ કૃતાન્તભૂતભાષિતઃ
    કૃતાન્તભીતિદાયકઃ કૃતાનનાભિનન્દિતઃ ।
કૃતાચિતસ્વકાલકઃ કૃતાકૃતાઘસત્ક્રિયં
    કૃતાનુકમ્પ એષ માં કૃતી યતીશ્વરોઽવતુ ॥ ૭૦॥

યતીશ્વરઃ કૃપામયઃ પરં પરો વિરાજતે
    ય એષ નિત્યનામકં ભૃશં દૃશાલ્પકાકૃતિમ્ ।
ગુરું પુનઃ પ્રભાવતઃ પ્રબન્ધમદ્ભુતં પરં
    વિધાય પાતિ માનવાન્ પુરાણપૂરુષપ્રિયમ્ ॥ ૭૧॥

(૪૪. શિખરિણી)
મહાનામોદોઽયં મમ મનસિ લીલાં વિતનુતે
    યતીન્દોરાસ્યેન્દોઃ અમૃતમિવ ભૂયો વિગલિતમ્ ।
પિબામ્યેવં નિત્યં વચનમતિરમ્યં ભગવતઃ
    મનઃકાન્તં માન્યં મધુરમધુરં સામ્યવિધુરમ્ ॥ ૭૨॥

યતીન્દોરાસ્યેન્દોરમૃતમિવ પીત્વા વિગલિતં
    વચસ્તાદૃક્ શ્રીમાન્ સ્વયમુપગતો હર્ષવિવશઃ ।
પ્રિયાં ત્યક્ત્વા ડિલ્યાં યદુશિખરિશીર્ષે વિજયતે
    તતસ્તામાયાતામપિ સ રમણીમાહ તદિદમ્ ॥ ૭૩॥

(૪૫. પૃથ્વી)
પ્રણમ્ય યતિમણ્ડલપ્રવરપાદપઙ્કોદિતં
    પ્રવેશમનવીનવાક્શિરસિ યો વિધત્તે પુમાન્ ।
પ્રમોદમતુલં વરં સ કિલ સત્યમત્રાશ્નુતે
    પ્રમોદભરપૂરિતો નયતિ કાલમસ્મિન્ કાલૌ ॥ ૭૪॥

કલિઃ પ્રથયતુ સ્વયં કમપિ વિભ્રમં સમ્ભ્રમાત્
    કઠોરમકપૂરિતં કલુષજાલકન્દાયિતમ્ ।
તથાઽપિ સુખમેધતે યતિવરસ્ય સૂક્તૌ રતઃ
    ચિરન્તનસરસ્વતીરસભરેણ યા પૂરિતા ॥ ૭૫॥

યતીશ્વરસરસ્વતીમનુભવન્તિ યે કોવિદાઃ
    યતીશ્વરસરસ્વતીમથ પઠન્તિ યે સાદરમ્ ।

યતીશ્વરસરસ્વતીમથ વહન્તિ યે પુસ્તકે
    યતીશ્વરધિયૈવ તાન્ ઇહ નમામિ સર્વાનપિ ॥ ૭૬॥

(૪૬. મન્દાક્રાન્તા)
આસૂર્યાખ્યે મહતિ મધુરે માન્યવંશેઽવતીર્ણઃ
    દિવ્યક્ષેત્રે સકલમહિતે પાવને દર્શનીયે ।
નામ્ના યત્તત્ સુરનરભુવા ભાષયા મિશ્રિતેન
    પ્રોક્તં જાતં જગતિ વિદિતં શ્રીપરુમ્ભૂધુરીતિ ॥ ૭૭॥

શ્રીર્યા શ્લાઘ્યા ભવતિ હિ સતાં તામિમાં સંવહન્તી
    ધૂર્યા તાં ભૂર્વહતિ યદિયં શ્રીપરુમ્ભૂધુરીતિ ।
તાદૃક્ નામ્ના ભવતિ જગતિ પ્રાપ્તકીર્તિઃ પુરીયં
    નામન્યુક્તાન્યહ ! વિમૃશતાં ભાતિ વર્ણાનિ તત્ત્વમ્ ॥ ૭૮॥

(૪૭. હરિણી)
કુવલયદલશ્યામે રામે રતસ્સતતં મુનિઃ
    યતિપતિરસાવીહામુક્તો હિતૈકરતો નતે ।
મધુરમધુરા ભાષાવેષાઃ કિરન્ નિજસંવિદઃ
    કલયતુ સદા નૃત્તં ચિત્તં મદીયમુપાશ્રિતઃ ॥ ૭૯॥

(૪૮. નર્કુટકમ્)
કરધૃતદણ્ડમસ્તુ મમ માનસવાઞ્છિતદં
    કટિતટરક્તવસ્ત્રકમનીયવપુઃપ્રવરમ્ ।
શુભમયશુભ્રપુણ્ડ્રસુભગાકૃતિ મઙ્ગલદં
    યતિપતિનામકં કિમપિ દૈવતમપ્રતિમમ્ ॥ ૮૦॥

યતિપતિમઞ્જુવક્ત્રગલિતાક્ષરપઙ્ક્તિધરં
    મતિમતિહર્ષજાલપરિવર્ષણકર્મકૃતિ (તમ્ ।) ।
સતિ પથિ નીયમાનનિગમાર્થમહાવિભવં
    રતિમિહ મે દદાતુ પરપુંસિ સુભાષ્યમિદમ્ ॥ ૮૧॥

(૪૯. કુસુમિતલતાવેલ્લિતા)
સ્વામી કાષાયં વપુષિ કલયન્ હસ્તપદ્મે ત્રિદણ્ડં
    શ્રીમચ્છ્રીચૂર્ણં પરિગતતનું શ્વેતપુણ્ડ્રૈસ્સુરમ્યમ્ ।
મૌલૌ સન્દૃશ્યાં કચચયકૃતાં સચ્છિખાં ભવ્યમૂર્તિ
    શ્રીમાનન્તર્મે વિલસતુ સદા સંયમીન્દ્રો મહાત્મા ॥ ૮૨॥

(૫૦. વિબુધપ્રિયા)
વારણાદ્રિશિરઃસ્થિતં વરદં સુપર્વમહીરુહં
વર્ધયન્ સ્વકરામ્બુના પરમુન્નતં સકલેડિતમ્ ।
સર્વદાઽતુલસદ્યં ચતુરાનનાધ્વરસમ્ભવં
સંયમિપ્રવરો ગુરુઃ ગુણવાન્ સદા સ વિરાજતે ॥ ૮૩॥

(૫૧. શાર્દૂલવિક્રીડિતમ્)
વન્દે લક્ષ્મણયોગિપાદયુગલં શોણાબ્જતુલ્યપ્રભં
વીથીધૂલિસમૂહક્લૃપ્તકવચં ભિક્ષાટનપ્રસ્થિતમ્ ।
યદ્વિન્યાસપવિત્રિતં ક્ષિતિરજશ્ચક્રાઙ્કુરેખોજ્જ્વલં
સ્વાઙ્ગુલ્યગ્રસમાદૃતં શુભકરં મૌલૌ વિધત્તે જનઃ ॥ ૮૪॥

શ્રીમદ્યામુનતીર્થસક્તહૃદયૌ પાણ્યાપ્તવંશોત્તમૌ
વિખ્યાતૌ ભુવિ યાદવાશ્રિતપદૌ રામાનુજૌ યૌ તયોઃ ।
એકઃ શ્રીવિબુધેન્દ્રજાતમહિતં મૂલં કિલાદૌ જગૌ
અન્યસ્તસ્ય તતશ્ચ ભાષ્યમનયોઃ પાદામ્બુજાન્યાશ્રયે ॥ ૮૫॥
(શ્રીકૃષ્ણયતિપત્યોઃ શ્લેષઃ)

શ્રીમલ્લક્ષ્મણયોગિરાજવચસાં માહાત્મ્યમત્યદ્ભુતં
કોઽહં વક્તુમિદં વદન્તિ સુધિયઃ શ્રીવત્સગુર્વાદયઃ ।
કાણાદપ્રમુખેષુ માસ્તુ ધિષણા શાસ્ત્રેષુ કાવ્યેષુ વા
સર્વત્રાઽપિ જયં યતીશ્વરગિરાં સેવા પ્રદદ્યાદિતિ ॥ ૮૬॥

શય્યા પદ્મવિલોચનસ્ય મહતઃ પુંસો ભુજઙ્ગાધિપઃ
સઞ્જાતો ધરણૌ કિલાયમભવત્ પૂર્વં મહાભાષ્યકૃત્ ।
સઞ્જાતોઽથ ચ પિઙ્ગલાહ્વયમુનિઃ છન્દશ્ચયં નિર્મમે
સઞ્જાતોઽથ ચ લક્ષ્મણાર્યમુનિરાટ્ શ્રીભાષ્યકારોઽભવત્ ॥ ૮૭॥

જાતો ભાષ્યકૃદેષ ભાષ્યકૃદભૂત્ શ્રીપિઙ્ગલઃ પિઙ્ગલે
વર્ષેઽભૂત્ મધુરોદિતોઽથ ચ મધૌ માસે ભવાત્તારકઃ ।
સઞ્જાતો ભવતારકે સકલમપ્યેતત્ પરં સામ્પ્રતં
તસ્માત્ સામ્પ્રતમેનમસ્મિ શરણં યાતો યતીનાં પતિમ્ ॥ ૮૮॥

શાસ્ત્રે શબ્દમયે તતાન વિહૃતિં જન્મન્યસાવાદિમે
મધ્યસ્થેઽથ ચ જન્મનીહ વિહૃતિં છન્દઃકુલેઽથોદિતે ।
જન્મન્યત્ર વિધાય ભાષ્યમુભયં ગદ્યત્રયં સારવત્

વેદાર્થસ્ય ચ સઙ્ગ્રહં યતિપતિઃ નિત્યં સ્થિતો દીપવત્ ॥ ૮૯॥

સઞ્ચારેણ પવિત્રિતક્ષિતિતલં સદ્ભિસ્સદા સેવિતં
કાઞ્ચીપૂર્ણકૃતીન્દ્રવાગ્વિલસિતૈઃ વિદ્યોતમાનાન્તરમ્ ।
વેદાર્થૌઘસમૃદ્ધશોભનનવગ્રન્થોદયૈકસ્થલં
શ્રીરામાનુજમઞ્ચવર્ણમધુરં સેવસ્વ હે ચિત્ત ! મે ॥ ૯૦॥
(શ્રીરામનુજશ્રીરામનુજપત્રિકયોઃ શ્લેષઃ)
(૫૨. સ્રગ્ધરા)
નામાભૂત્તે ત્રિવર્ણં ત્રિજગદભિહિતં લક્ષ્મણ ! શ્રીયતીન્દો !
સૌત્રં ભાષ્યં ત્રિધેદં ત્રિવિધમપિ કૃતં ગદ્યમત્ર ત્વયેદમ્ ।
વાણી સેયં ત્રિધામ્નઃ વિવૃતતનુરભૂત્ યા ત્રિષટ્કાભિરામા
ત્રિત્રિગ્રન્થપ્રણેતઃ ! ત્રિમુનિવર નમસ્તે ગૃહીતત્રિદણ્ડ ! ॥ ૯૧॥

“ગાથાતાથાગતાનાં” ઇતિ નિગમશિરોદેશિકઃ પ્રાહ યં તે
સ્તોત્રે શ્લોકં મહાન્તં તમિહ વયમહો કીર્તયન્તો મહાન્તમ્ ।
વિન્દેમાનન્દમન્તર્વિધુતસમશુચો વિસ્તૃતાપાર્થસાર્થાન્
નાન્યાન્ સ્વપ્નેઽપિ યામો વિમતસૃતિમતો જીવસઞ્જીવકામાઃ ॥ ૯૨॥

(૫૩. પાદાકુલકમ્)
મા માં રામાં ચેતો યાયાઃ
શ્રીમદ્રામાવરજં યાયાઃ ।
રામાસ્સર્વા અનુજા એતાઃ
કામાન્નેમા વામાઃ કુર્યાઃ ॥ ૯૩॥

(૫૪. ગીતિઃ)
યતિપતિપાદપયોજે
યદિ મતિરીષન્નિવેશિતા ભવતિ ।
યમ ઇતિ તસ્ય વ પૂરિતિ
યવલવમાત્રં ન વિદ્યતે ચિન્તા ॥ ૯૪॥

પિઙ્ગલવત્સરજાતઃ
પિઙ્ગલમુનિરેવ લક્ષ્મણાર્યોઽયમ્ ।
મઙ્ગલસન્તતિદાયક
તુઙ્ગગુણાશ્લિષ્ટવૃત્તકુલભૂમિઃ ॥ ૯૫॥

લક્ષ્મણ ! યતિવર ! સ ભવાન્

અતિમહિતો નસ્સુબન્ધુરત એવ ।
વાસવભવાય દત્તા
વિવૃતા ભવતાત્ર હૃદ્યગદ્યકૃતા ॥ ૯૬॥

(ઉપજાતિઃ)
શ્રીભાષ્યસિંહાસનમાત્મનીનં
અસ્મત્કુલશ્રીતિલકાય દત્વા ।
સ્વભાગિનેયાય તુતોષ ભૂયઃ
યસ્તં પ્રપદ્યે શરણં યતીન્દ્રમ્ ॥ ૯૭॥

(ગીતિઃ)
યતિપતિષણ્ણવતિરિયં
દ્વિજપતિસુસ્કન્ધલાલનીયાઙ્ગા ।
હ્રસ્વા ચ વર્ધમાના
સેવ્યા પરમેવ દેવતા જયતિ ॥ ૯૮॥

યતિપતિષણ્ણવતિરિયં
સુગુણા શુદ્ધા સુવૃત્તજાતયુતા ।
બ્રાહ્મીં શ્રિયં વહન્તી
કણ્ઠાભરણં સતાં સદા ભવતુ ॥ ૯૯॥

(ત્વરિતગતિઃ)
યતિપતિષણ્ણવતિરિયં
કવિમણિમાનિધિરચિતા ।
નિજપઠને રતધિષણં
સમકુશલં વિરચયતિ ॥ ૧૦૦॥

યતિપતિષણ્ણવતિઃ ॥

ઇતિ શ્રીમદાશુકવિસાર્વભૌમસ્ય શ્રીનિધેઃ કૃતિષુ
યતિપતિષણ્ણવતિં સમ્પૂર્ણમ્ ।

Footnotes  ટિપ્પણી

(૧) આગામિનિ પિઙ્ગલે વત્સરે ભગવતઃ શ્રીરામાનુજસ્ય ષોડશી ષષ્ટિપૂર્તિઃ (૯૬૦ સંવત્સરાણાં પૂર્તિઃ) ભવિતા । સા ચ ઉત્સવૈઃ પૂર્ણા કર્તવ્યા । તદઙ્ગતયા શ્રીરામાનુજવિષયકાઃ પ્રબન્ધાઃ ઉપન્યાસાશ્ચ વિદ્વદ્ભિઃ કર્તવ્યાઃ । ઇતિ પ્રાર્થયે ।" –

ઇતિ શ્રીકાઞ્ચી વિદ્વદ્વરેણ્ય પદ્મભૂષણ મહામહિમોપાધ્યાય, પ્રતિવાદિ-
ભયઙ્કરમણ્ણઙ્ગરાચાર્ય સ્વામિનઃ સ્વકીય "રામાનુજન્" નામ
દ્રમિડપત્રિકાયાં સન્દેશમદિશન્ । શ્રીકવીશ્વરાઃ તેન સન્દેશેન
પ્રચોદિતાઃ ૯૬૦ સંવત્સરપૂર્તિજન્મર્ક્ષોત્સવત્વાત્ અસ્ય, ૯૬ શ્લોકૈઃ
પૂર્ણાં ઇમાં યતિપતિષણ્ણવતિં અરચયન્ ॥

(૨) નલાગ્રજશરશ્ચાપજઃ - રાક્ષસવત્સરે ધનુર્માસે જાતઃ ઇત્યર્થઃ ।
ચાપપત્તને-ધનુષ્પુરે । શ્રીકવિસાર્વભૌમાનાં ગુરવઃ શ્રીવાત્સ્યવેઙ્કટ-
શેષાર્યમહાદેશિકાઃ રાક્ષસવર્ષે ચાપમાસિ અવતારં કૃતવન્તઃ । તત
એવં વર્ણના ॥

(૩) નલાનુજશરત્-પિઙ્ગલવત્સરઃ । મધુજાતઃ-ચૈત્રમાસે કૃતાવતારઃ
"મધુશ્ચ માધવશ્ચ વાસન્તિકાવૃત્" ઇતિ ભગવતી શ્રુતિઃ ॥

(૪) નવમિદં વૃત્તમ્ । યતિનુતિરિતિ નામધેયમસ્ય અસ્માભિઃ દત્તમ્ ॥

(૫) ભવસ્ય તારેઃ - આર્દ્રાનક્ષત્રે-
"આર્દ્રા નક્ષત્રં રુદ્રો દેવતા" ઇતિ શ્રુતિઃ ॥

(૬) નરપ્રિયા – નવમિદં વૃત્તં કવિપ્રયુક્તમ્ ।
ઇદસ્માભિઃ દત્તં નામધેયમસ્ય ॥

(૭) યાદવી - નવમિદં વૃત્તમ્ । એતદસ્માભિઃ દત્તં નામધેયમ્ ॥

(૮) યતિમહિતા - નવમિદં વૃત્તમ્ । એતદસ્માભિઃ દત્તં નામધેયમ્ ॥

(૯) કમલા નામ યતિપતેઃ ભગિની । યસ્યાઃ વંશે જાતા એતે કવીશ્વરાઃ ॥

કવિતાજિતકલ્લોલિકન્યકાકાન્તવક્ષસે ।
કરુણાદિગુણાઢ્યાય કમલાનિધયે નમઃ ॥

॥ શ્રીનિધયે નમઃ ॥

The footnotes are given as number enclosed in parenthesis.

Proofread by Aruna Narayanan

*Yatipati Shannavatih*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*